# *Ṛgveda 10.90 - Puruṣasūkta*

| *Saṃhitā* | *Padapāṭha* |
|---|---|
| १० ॥९० ॥१ | |
| सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्<br>स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलम् | सहस्रऽशीर्षा पुरुषः सहस्रऽअक्षः सहस्रऽपात्<br>सः भूमिं विश्वतः वृत्वा अति अतिष्ठत् दशऽअंगुलम् |
| १० ॥९० ॥२ | |
| पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्<br>उतामृतत्वस्येशानो यदन्नेनातिरोहति | पुरुषः एव इदं सर्वं यत् भूतं यत् च भव्यम्<br>उत अमृतऽत्वस्य ईशानः यत् अन्नेन अतिऽरोहति |
| १० ॥९० ॥३ | |
| एतावानस्य महिमातो ज्यायांश्च पूरुषः<br>पादो ऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि | एतावान् अस्य महिमा अतः ज्यायान् च पुरुषः<br>पादः अस्य विश्वा भूतानि त्रिऽपात् अस्य अमृतं दिवि |
| १० ॥९० ॥४ | |
| त्रिपादूर्ध्व उदैत्पुरुषः पादो ऽस्येहाभवत्पुनः<br>ततो विष्वङ्व्यक्रामत्साशनानशने अभि | त्रिऽपात् ऊर्ध्वः उत् ऐत् पुरुषः पादः अस्य इह अभवत् पुनः<br>ततः विष्वङ् विअक्रामत् साशनानशने अभि |
| १० ॥९० ॥५ | |
| तस्माद्विराळजायत विराजो अधि पूरुषः<br>स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः | तस्मात् विऽराट् अजायत विऽराजः अधि पुरुषः<br>सः जातः अति अरिच्यत पश्चात् भूमिं अथो पुरः |
| १० ॥९० ॥६ | |
| यत्पुरुषेण हविषा देवा यज्ञमतन्वत<br>वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः | यत् पुरुषेण हविषा देवाः यज्ञं अतन्वत<br>वसंतः अस्य आसीत् आज्यं ग्रीष्मः इध्मः शरत् हविः |
| १० ॥९० ॥७ | |
| तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः<br>तेन देवा अयजन्त साध्या ऋषयश्च ये | तं यज्ञं बर्हिषि प्र औक्षन् पुरुषं जातं अग्रतः<br>तेन देवाः अयजन्त साध्याः ऋषयः च ये |
| १० ॥९० ॥८ | |
| तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्<br>पशून्तांश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये | तस्मात् यज्ञात् सर्वऽहुतः संऽभृतं पृषत् आाज्यम्<br>पशून् तान् चक्रे वायव्यान् आरण्यान् ग्राम्याः च ये |
| १० ॥९० ॥९ | |
| तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे<br>छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत | तस्मात् यज्ञात् सर्वऽहुतः ऋचः सामानि जज्ञिरे<br>छंदांसि जज्ञिरे तस्मात् यजुः तस्मात् अजायत |

| *Saṃhitā* | *Padapāṭha* |
|---|---|
| १० ॥९० ॥१० | |
| तस्मादश्वा अजायन्त ये के चोभयादतः | तस्मात् अश्वाः अजायन्त ये के च उभयादतः |
| गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः | गावः ह जज्ञिरे तस्मात् तस्मात् जाता अजावयः |
| १० ॥९० ॥११ | |
| यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् | यत् पुरुषं वि अदधुः कतिधा वि अकल्पयन् |
| मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते | मुखं किं अस्य कौ बाहू कौ ऊरू पादो उच्येते |
| १० ॥९० ॥१२ | |
| ब्राह्मणो ऽस्य मुखमासीद्बाहू राजन्यः कृतः | ब्राह्मणः अस्य मुखं आसीत् बाहू राजन्यः कृतः |
| ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत | ऊरू तत् अस्य यत् वैश्यः पत्ऽभ्यां शूद्रः अजायत |
| १० ॥९० ॥१३ | |
| चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत | चन्द्रमाः मनसः जातः चक्षोः सूर्यः अजायत |
| मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजायत | मुखात् इंद्रः च अग्निः च प्राणात् वायुः अजायत |
| १० ॥९० ॥१४ | |
| नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत | नाभ्याः आसीत् अन्तरिक्षं शीर्ष्णः द्यौः सं अवर्तत |
| पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् | पत्ऽभ्यां भूमिः दिशः श्रोत्रात् तथा लोकान् अकल्पयन् |
| १० ॥९० ॥१५ | |
| सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः | सप्त अस्य आसन् परिऽधयः त्रिः सप्त संऽइधः कृताः |
| देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् | देवाः यत् यज्ञं तन्वानाः अबध्नन् पुरुषं पशुम् |
| १० ॥९० ॥१६ | |
| यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् | यज्ञेन यज्ञं अयजन्त देवाः तानि धर्माणि प्रथमानि आसन् |
| ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः | ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः |